# विभक्तिः

## ०५ – ०३.१०.२०१५

व्योम-संस्कृत-पाठशाला
www.sanskritfromhome.in

# मङ्गलम्

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमूः रामाय तस्मै नमः ।
रामात् नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम्
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ॥

# मङ्गलम्

गुरुरेव गतिः गुरुमेव भजे
गुरुणैव सहास्मि नमो गुरवे।
न गुरोः परमं शिशुरस्मि गुरोः
मतिरस्ति गुरौ मम पाहि गुरो॥

व्योम-संस्कृत-पाठशाला ©2015। www.sanskritfromhome.in | www.vyomalabs.in |

# पुनरावर्तनम्

- प्रथमाविभक्तिः – वस्तुनिर्देशे, कर्तरि, कर्मणि
- सम्बोधनप्रथमाविभक्तिः
- द्वितीयाविभक्तिः – कर्मपदम्, कर्मपदात् द्वितीयाविभक्तिः

# अभ्यासः – १

## [प्रश्नः, उत्तरम्, सेविका, अम्बा, गृहम्, लेखनी]

- अम्बा ________________ आह्वयति।
- त्वम् ________________ प्रविशसि।
- अध्यापकः ________________ पृच्छति।
- छात्राः ________________ वदन्ति।
- अहम् ________________ नमामि।
- महिला ________________ क्रीणाति।

# अभ्यासः – २

## [इक्षुखण्डः, हरिणी, दण्डः, गुहा, जलम्, नदी]

- वानरः _________________________ क्षिपति।
- अश्वः _________________________ पिबति।
- गजः _________________________ खादति।
- सिंहः _________________________ प्रविशति।
- व्याघ्रः _________________________ आक्रामति।
- हरिणाः_________________________ गच्छन्ति।

व्योम-संस्कृत-पाठशाला ©2015। www.sanskritfromhome.in | www.vyomalabs.in |

# द्वितीयाविभक्तौ रूपाणि

| | | |
|---|---|---|
| बालम् | बालौ | बालान् |
| बालिकाम् | बालिके | बालिकाः |
| लेखनीम् | लेखन्यौ | लेखन्यः |
| फलम् | फले | फलानि |

# अभ्यासः – ३

## कर्मपदं द्विवचने/बहुवचने परिवर्तयत

- विद्वान् ग्रन्थं पठति।
- बालः मृगं पश्यति।
- कृषिकः वृक्षं सिञ्चति।
- महिला शाटिकां क्रीणाति।
- सः पत्रिकां पठति।
- माता कथां वदति।
- शिशुः फलं खादति।
- बालिका पुस्तकं स्वीकरोति।
- एषा फेनकम् आनयति।
- मित्रं लेखनीं ददाति।
- पिता घटीं क्रीणाति।
- सा कूपीं नयति।

व्योम-संस्कृत-पाठशाला ©2015। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ४

## किं पश्यति?



# अभ्यासः – ५

## वाक्यं द्विवचने/बहुवचने परिवर्तयत

- छात्रः पाठं पठति।
- बालिका लेखनीं क्रीणाति।
- वानरः फलं खादति।
- गोपी गीतं गायति।
- मित्रं शुनकम् आनयति।
- पितामही कथां वदति।
- अध्यापकः प्रश्नं पृच्छति।
- छात्रः उत्तरं वदति।
- सेविका पात्रं प्रक्षालयति।
- नारी द्विचक्रिकां चालयति।
- मित्रं लेखनीम् इच्छति।
- जनकः वार्तां शृणोति।

व्योम-संस्कृत-पाठशाला ©2015। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ६
# कथां पूरयत

एकः  अस्ति। सः पिपासितः  अन्विष्यति। दूरे एकं  पश्यति। घटे जलं किञ्चिदेव अस्ति। समीपे एव  सन्ति। काकः  घटे क्षिपति।  उपरि आगच्छति। काकः सन्तोषेण पिबति।

# द्विकर्मकप्रयोगाः

- अध्यापकः छात्रं प्रश्नं पृच्छति।
- गुरुः शिष्यं धर्मं बोधयति।
- बालकः अम्बां सत्यं वदति।
- भिक्षुकः धनिकं धनं प्रार्थयति।
- बालः शालां लेखनीं नयति।

# अभ्यासः - ७

- चालकः (आपणिकः) (मार्गः) पृच्छति।
- गोपालः (धेनुः) (गोष्ठः) नयति।
- जनकः (अम्बा) (वार्ता) वदति।
- कृष्णः (अर्जुनः) (गीता) बोधयति।
- भिक्षुकः (गृहिणी) (भोजनम्) प्रार्थयति।
- छात्राः (अध्यापकः) (सन्देहाः) पृच्छन्ति।

व्योम-संस्कृत-पाठशाला ©2015। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - ७

- माता (बालाः) (कथाः) कथयति।
- बालिका (शाला) (पुस्तकानि) नयति।
- जनाः (नायकः) (साहाय्यम्) प्रार्थयन्ति।
- योगी (शिष्याः) (मन्त्राः) उपदिशति।
- भक्ताः (मन्दिरम्) (पुष्पाणि) नयन्ति।
- पिता (कार्यालयम्) (लेखन्यः) नयति।

व्योम-संस्कृत-पाठशाला ©2015। www.sanskritfromhome.in | www.vyomalabs.in |

# रटनम्